# अथ मंगलकवचम्

रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् ।

धरासुतः शक्तिधरश्च शूलो सदा मम स्याद्वरदः

प्रशान्तः । ।1 ||

अङ्गारकः शिरो रक्षोन्मुखं वै धरणीसुतः ।

श्रवौ रक्ताम्बरः पातु नेत्रे मे रक्तलोचनः ||2

नासां शक्तिधरः पातु मुखं मे रक्तलोचनः।

भुजौ मे रक्तमाली च हस्तौ शक्तिधरस्तथा ।।3 ||

वक्षः पातु वराङ्गश्च हृदयं पातु रोहितः ।

कटिं मे ग्रहराजश्च मुखं चैव धरासुतः ।।4 |

जानुजचे कुजः पातु पादौ भक्तप्रियः सदा।

सर्वाण्यन्यानि चाङ्गानि रक्षेन्मे मेषवाहनः ।।5 | |

य इदं कवचं दिव्यं सर्वशत्रुनिवारणम् ।

भूतप्रेतपिशाचानां नाशनं सर्वसिद्धिदम् ।।6 ।।

सर्वरोगहरं चैव सर्वसम्पत्प्रदं  शुभम् ।

भुक्तिमुक्तिप्रदं नृणां सर्वसौभाग्य-वर्धनम् ।

रोगबन्धविमोक्षं च सत्यमेतन्न संशयः । ।7 ।

।। इति श्रीमार्कण्डयपुराणे मङ्गलकवचं सम्पूर्णम् ।।

---


**www.astromanu.com**

**Mob no-7983298169**